International Journal of Jyotish Research: 2020; 5(2): 16-21

International Journal of Jyotish Research (वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2020; 5(2): 16-21
© 2020 Jyotish
www.jyotishajournal.com
Received: 11-09-2020
Accepted: 14-10-2020

**डॉ. शिवाकान्तमिश्रः**
सहायकाचार्यः,ज्योतिषविभागः,
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत–विश्वविद्यलयः, जयपुरम्,
राजस्थान, भारत

**Correspondence**
**डॉ. शिवाकान्तमिश्रः**
सहायकाचार्यः,ज्योतिषविभागः,
जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत–विश्वविद्यलयः, जयपुरम्,
राजस्थान, भारत

# ज्योतिषशास्त्रोक्तदिशा आजीविकाविमर्शः

**डॉ. शिवाकान्तमिश्रः**

**प्रस्तावना**

गीतायां भगवान् श्रीकृष्णः कथयति यत् पृथिव्यां स्थितप्राणवानजीवपादपाश्चाहर्निशमिच्छयानिच्छया वा कर्मं कुर्वन्ति अर्थात् कदाप्यकर्मकृत न तिष्ठन्ति । मानवकृतकार्याणां विभाजनं द्विधा कर्तुं शक्यते लौकिकं पारलौकिकं च । लौकिकपारलौकिककार्ययोरुद्देश्यं भिन्नं–भिन्नं भवति । यद्यपि पृथिव्यां जायमानानां सर्वेषां कार्याणामुद्देश्यमेकमेव पारलौकिकं भवति । सर्वेषां कार्याणां समयः उद्देश्यं फलं च पूर्वनिर्धारितं भवति तदुपरि कस्याप्यधिकारो न भवति । हितोपदेशे उक्तं वर्तते यत् जातकस्याजीविकायाः निर्धारणम्, आयुः, वित्तं, विद्या, मृत्युश्चैतानि जीवनस्य पंचकार्याणि स्वकीयेन प्रारब्धेन निश्चितानि भवन्ति अर्थात् जन्मकालिकग्रहवशात् जायन्ते ।

आयुः कर्म च वित्तं च विद्या निधनमेव च ।
पंचैतानि सृज्यन्ते गर्भस्थस्यैव देहिनः ।।

मानवः यया वृत्या स्वपरिवारस्य पोषणाय धनमुपार्ज्जयति जीवनं च यापयति सा आजीविका । अस्मिन् लोके आजीविका युक्ता एव मानवाः सुखं, धनं, सिद्धिं च प्राप्नुवन्ति । जीविकामाश्रित्यैव मानवः स्वकीयं भाग्यं निर्माति । यां विना सर्ववैभवविहीनो भवति मानवः । अतः अमरकोषे उक्तं वर्तते यत् " आजीवो जीविका वार्त्ता वृत्तिर्वर्तनजीवने " इत्यनेन जीविका नाम जीवनम् [1] । अनेन सुखपूर्वकजीवनयापनार्थमाजीविकायाः स्थानं सर्वोपरि वर्तते । मनुस्मृत्यानुसारं विद्या, शिल्पकला, वैतनिककार्यं, सेवावृत्तिः, पशुपालनं, वाणिज्यं, कृषिः, धृतिः, भैक्ष्यं, कुसीदं च एते दशविधजीवनहेतवः सन्ति । यथोक्तम् [2] –

विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः ।
धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः ।।

अर्थात् मनुस्मृत्यां मानवानां जीवनोपार्जनाय दशप्रकारकाणामाजीविकानां चर्चा कृता वर्तते । 1.विद्याया अंगिभूता वेदविद्याव्यतिरिक्ता वैद्यक–तर्क–ज्योतिषादिविद्याभिः, 2. वस्त्रभवनयन्त्रादिनिर्माणैः, 3. वेतनादिभिः (प्रेष्यभावेन वेतनग्रहणं कृत्वा), 4. पराज्ञासम्पादनैः, 5. पशुपालनैः, 6. वाणिज्यकर्मभिः, 7. कृषिकर्मभिः, 8. धृतिभिः, 9. भिक्षवृत्या, 10. वृद्ध्याधन(व्याजमाध्यमेन) प्रयोगैश्च । एताभिः दशविधजीविकाभिः मानवाः स्वकीयं जीवनं निर्वहन्ति । तत्रैव जात्यानुसारं धर्मानुकूलाः दायाद्याः सप्तवित्तागमाः उक्ताः । दायः(पैतृकसम्पत्तिः), लाभः, क्रयश्च एते त्रयः धर्म्याः (धर्मानुकूलाः वित्तागमाः), चतुर्णामपि वर्णानां कृते, विजयत्वेन धनागमः क्षत्रियाणां कृते, प्रयोगो वृद्ध्यादिधनस्य, कर्मयोगश्च (कृषिवाणिज्ये) एतौ वैश्यानां धर्म्यौ, सत्प्रतिग्रहो (शास्त्रोक्तदानेन प्राप्तः धनः), ब्राह्मणस्य धर्म्यश्च । यथोक्तं मनुस्मृत्याम् [3] –

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ।।

गृहस्थानां मध्ये यो बहुपोष्यवर्गः स प्रकृतैर्ऋतायाचितभैक्षकृषिवाणिज्यैस्तेन कुसीदिनेत्येवं षड्भिः कर्मभिः स्वपरिवारस्य पालनं पोषणं च करोति । ततोऽल्पपरिकरः त्रिभिर्याजनाध्यापनप्रतिग्रहैः स्वपरिवारस्य पोषणाय जीवति । अपरः पुनः याजनाध्यापनाभ्यां जीवति । चतुर्थः ब्राह्मणः वेदाध्यापनेन जीवति । यथोक्तं मनुस्मृत्याम् [4] –

षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ।।

अग्निपुराणेऽपि ब्राह्मणानां कृते कृषिगोरक्ष्यवाणिज्यकुसीदानि उपदिष्टानि । शुक्राचार्येण आजीविकासु कृषिकर्ममुत्तमां, वाणिज्यवृत्तिं मध्यमां, सेवावृत्तिं चाधमां स्वीकरोति । धर्मशास्त्रानुसारमध्यापनमध्ययनं, यजनं, याजनं दानं तथा प्रतिग्रहः एतानि षट्कर्माणि ब्राह्मणानां कृते वर्तते । एतेषु याजनं, अध्यापनं, प्रतिग्रहश्च ब्राह्मणानामाजीविका यथोक्तं मनुस्मृतौ [5]–

षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ।।

क्षत्रियाः शस्त्रास्त्रैः, वैश्याः वाणिज्यपशुपालनकृषिकर्मैश्च स्वजीवनं यापनं करणीयम् । पुनः कथ्यते यत् ब्राह्मणानां कृते वेदाध्ययनं, क्षत्रियाणां कृते प्रजारक्षणं, वैश्यानां कृते वाणिज्यं च विशेषकर्माणि सन्ति [6]। अवश्यकतानुसारं ब्राह्मणाः क्षत्रियाणां वैश्यानामपि आजीविकात्, क्षत्रियाः वैश्याणां च आजीविकान् स्वीकरिष्यन्ति [7]। बृहत्पराशरस्मृतौ उल्लिखितं वर्तते यत् जीविकोपार्जनार्थं सर्वप्रथमाजीविकामार्गं कृषिवाणिज्यं, द्वितीयं पशुपोषणं, तृतीयं क्रयविक्रयं चतुर्थं राजसेवा च । यथोक्तम् [8] –

प्रथमं कृषिवाणिज्यं द्वितीयं पशुपोषणम् ।
तृतीयं क्रीतविक्रीतं चतुर्थं राजसेवनम् ।।

यद्यपि स्मृत्यादिग्रन्थेषु आजीविकायाः निर्द्धारणं जात्यानुसारं कृतं वर्तते । परन्तु सम्प्रति धर्मग्रन्थोक्त आजीविकायाः विचारः समयानुकुलो न वर्तते । यतोहि आधुनिककाले आजीविकायाः क्षेत्रं विस्तृतं जातम् । तत्र स्वतंत्रकार्यक्षेत्रस्यापि बहबो भेदाः सन्ति। सम्प्रति आजीविकानां योग्यतानुसारं विशेषवृत्तेः चयनं या अस्माकं जीवनस्याधारशिला भवति । पुराकालादेव व्यापारः वाणिज्यं वा आर्थिकसमृद्धेः महत्त्वपूर्णसाधनमस्ति । भारतीयवैदिकचिन्तने मानवस्य व्यष्टिगतसमष्टिगतोन्नत्यर्थं चतुर्णां पुरुषार्थाणामावश्यकता सर्वोपरि वर्तते । यद्यपि पुरुषार्थचतुष्टयेषु अर्थस्य स्थानं द्वितीयं मन्यते । तथापि आचार्यचाणक्येन ''धर्मस्य मूलं अर्थः'' मन्यते । धर्मपूर्वकमर्थोपार्जनं संचयं च कल्याणकारी वर्तते । ''ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानु चिन्तयेत् '' इति नीतिशास्त्रवचनानुसारं ब्राह्ममुहूर्ते उत्थाय धर्मविषये अर्थविषये च चिन्तनं करणीयम् । अतः प्राचीनकालादेव मानवाः राजकीयसेवाभिः, कृषि–पशुपालन–चतुष्पदक्रयविक्रय– उद्योग–शिल्पजन्यवस्तूनां व्यापारैः, कश्चन भिक्षावृत्त्या, सेवावृत्त्या च स्वकीयमाजीविकां निर्वहन्ति। आजीविका अस्माकं जीवनस्य मूल्यं, जीवनदृष्टिं, प्रवृत्तिं च प्रभवति। अतः जीविकानिर्धारणमत्यधिकं महत्त्वपूर्णं वर्तते। कुण्डल्यां दशमभावात् कर्मणः प्रवृत्तिः, आज्ञां, कीर्तिं, वृष्टिं, प्रवासज्ञानं, मानं, कर्माजीवं च विचार्यते। यथोक्तम् [9]–

दशमात्प्रवृत्तिमाज्ञां कीर्तिं वृष्टिं प्रवासपूर्तादीन् ।
मानं कर्माजीवं जानुस्थानं च निर्दिशेद्दासान् ।।

कर्मनाथेन वा मुक्तिप्रश्ने पूर्तिं विनिर्दिशेत । अर्थात् दशमभावात् मुक्तिप्रश्नमुचितम् [10]। सारावल्यां कल्याणवर्मणा उक्तं यत् लग्नात् दशमभावात् कर्मफलविचारः कर्तव्यः। दशमभावगतराश्यानुसारं, दशमस्थग्रहस्य स्वभावानुसारं, कर्मनिर्धारणं युक्तियुक्तम् । मानवः स्वजीवने कर्मणा एव धनमर्जयति तेन जीविकानिर्वाहं करोति । कुण्डल्यां कर्मभावः दशमभावः मानवः स्वशारीरिकपरिश्रमेण मानसिकशक्त्या, आत्मबलेन च स्वाजीविकां निर्वहति । अतः कुण्डल्यां लग्नात्, चन्द्रात्, सूर्यात् च दशमभावेषु कर्मविचारः क्रियते। नवमभावः भाग्यभावः । भावात् भावम् इति नियमेन नवमभावात् नवमभावः अर्थात् पंचमभावः अपि भाग्यभावः । जीवने स्वकर्मणि सुखपूर्वकजीवनयापनार्थं कुण्डल्यां भाग्यवान् योगस्य परमावश्यकता वर्तते । द्वितीयभावः धनभावः। कर्मणा धनोपार्जनं भवति । अतः द्वितीयभावादपि आजीविकाविचारः क्रियते । एकादशभावः लाभभावः । अतः दशमद्वितीयपंचमनवमैकादशभावेषु विशेषरूपेण आजीविका विचारः क्रियते । पंचमद्वितीयभावद्वयाभ्यां विद्याबुद्ध्यादीनां विचारः क्रियते । यतोहि अधुना आजीविकानिर्धारणं मुख्यतया शिक्षाक्षेत्रे प्राप्तोपाधिना भवति । ज्योतिषशास्त्रे आजीविकायाः निर्द्धारणमाजीविकाकारकग्रहानुसारं क्रियते । आजीविकाकारणनिर्णयार्थं केचन् नियमाः निरूपिताः सन्ति ।

- लग्नाच्चन्द्राच्च यः दशमभावगतग्रहः अर्थात् एतयोर्मध्ये यो बलि तस्य ग्रहस्य या वक्ष्यमाणजीविका तया जीविकया जातकः जीवनं यापयति धनमर्जयति च ।
- यदि लग्नाच्चन्द्रादपि दशमे कोऽपि ग्रहः न स्यात् तर्हि भिन्नरित्या आजीविकायाः निर्द्धारणं भवति [11]। इदृश्यां स्थित्यां लग्नचन्द्रसूर्येभ्यः ये दशमेशास्ते येषां नवांशगताः स्युः तेषां ग्रहाणां पृथक् पृथक् या वृत्तिस्तया जातकस्याजीविका भवति । ते ग्रहाः स्व–स्वदशाकाले स्व–स्ववृत्या धनदाः भवन्ति । जातकपारिजाते बृहज्जातके च इदृशः विचारः परिदृश्यते । तथा हि जातकपारिजाते [12] –

अर्थाप्तिं पितृजननीसपत्नमित्रभ्रातृस्त्रीभृतकजनाद्दिवाकराद्यैः ।
होरेन्द्वोर्दशमगतैर्विकल्पनीया भेन्द्वर्कास्पदपतिगांशनाथतुल्या ।।

- सारावल्यानुसारं लग्नचन्द्रयोर्दशमेशस्य नवांशपतेः या वक्ष्यमाणा वृत्तिस्तया एव तस्य जातकस्य जीवनं वाच्यम् । तत्र द्वयोर्मध्येऽधिकबलयुक्तग्रहात् वृत्तिं कथयेत् । दशमे ग्रहाभावे दशमेशग्रहवृत्त्या चार्थलाभमाजीविकालाभं च भवति । यथोक्तम् [13]–

होरेन्द्वोर्बलयोगाद्यो दशमस्तत्स्वभावजं कर्म ।
तस्याधिकपरिवृद्ध्या वृद्धिर्ज्ञेयाऽन्यथा हानिः ।।

अपि च जातकपारिजाते [14] –

अर्थाप्तिं कथयेद्विलग्नशशिनोर्मध्ये बली यस्ततः ।
कर्मेशस्थनवांशराशिवशाद् वृत्तिं जगुस्तद्विदः ।।

- जैमिनीसूत्रे आत्मकारकात् जीविकानिर्द्धारणविधि उल्लिखिता अस्ति । '' स इष्ट बन्धमोक्षयो '' इत्यनेन आत्मकारक एव मानवस्य सुखानां दुःखानां च कारकः [15]। अतः तस्मात् जीवनवृत्यां निद्धारणं उचितम् ।
- उत्तरकालामृतानुसारं न केवलम् आत्मकारकस्य नवांशवशादपितु द्वादशांशवशादपि वृत्तेः विचारः करणीयः ।
- उत्तरकालामृते अमात्यकारकस्य नवांशवशादपि वृत्तेः विचारः कृतः वर्तते । तद्यथा [16] –

एवं तद् गृहतो नवांशकवशात्तद् द्वादशांशाच्च वा ।
तन्यूनांशगखेचरादपि वदेद् वृत्तिं तथा पौरुषम् ।।

जैमिनीसूत्रे आत्मकारकांशवशात् बहवः आजीविकाकारकयोगाः निरूपिताः सन्ति । आत्मकारकांशे यदि सूर्यश्चेत्तदा जातकः राजकर्मपरो भवति । अस्मिन् योगे सूर्यग्रहस्य बलतारतम्यवशात्कर्मचारि–राजसेवक– प्रभृतिश्रेष्ठपदैः विभूषितो भवति । यदि आत्मकारकांशे पूर्णेन्दुशुक्रौ भवेतां तदा जातकः विद्याजीवि भवति । भौमे धातुवादी, रसायनवेत्ता, वह्निजीविश्च भवति । बुधे वणिक् सूत्रवस्त्रादीनां निर्माता च भवति, जीवे वेदविद्, शनिश्चरे कुलपरम्परागतव्यवसायेन जातकः आजीविकायाः निर्वाहं करोति। राहु चेत्तदा दस्युः, लौहनिर्मितयन्त्रादीना च जीविकामुपार्जयति [17]। कारकांशलग्नात् तृतीये षष्ठे वा पापग्रहे सति जातकः कृषिकर्मकर्ता भवति । योगेऽस्मिन् यदि नवमे गुरुर्वर्तते तर्हि जातकः विशेषरूपेण कृषिकार्यकर्ता अर्थात् कृषिविशेषज्ञो भवति [18]। कारकांशाच्चतुर्थे शनौ वर्तमाने जातकः धनुर्विद्यानिपुणः, धनुना जीविकोपार्जनं करोति ।

कारकांशाच्चतुर्थे केतुना सति जातकः घटिकायन्त्रनिर्माता वा तत् सम्बन्धिव्यवसायी भवति । तत्र भौमे सति कुन्ती कुन्तनिर्माता वा भवति । आत्मकारकांशात् त्रिकोणे पापद्वये मान्त्रिकः, त्रिकोणे पापद्वये युते पापद्वये दृष्टे च जातकः दण्डाधिकारी भवति । आत्मकारकग्रहस्य नवांशोपरि सूर्यशुक्रयोः दृष्टिः वर्तते तर्हि जातकः राजकीयसेवको भवति । यदि तस्मात् यः दशमस्थानं तं उपरि यदि बुधस्य दृष्टिः वर्तते तर्हि जातकः राजकीयसेवको भवति । दशमभावगताः सूर्यभौमशनयः यदा शुभग्रहाणां दृष्टेः रहिताः स्युः तर्हि जातकः भृतको भवति । शनेः नवांशे नीचराशिगतशुक्रः चन्द्रः सूर्यो वा यदि द्वादशभावे स्यात्तर्हि जातकः भृतको भवति। दशमभावगतपापग्रहोपरि यदि शुभग्रहाणां दृष्टिः न वर्तते तर्हि जातकः भृतको भवति । एतेषां भृतकयोगानां चर्चा जातकतत्त्वे प्राप्यते । तद्यथा [19]–

अंशे रविशुक्रदृष्टे राजप्रेष्यः ।। अंशात्खे ज्ञदृष्टयुते राजप्रेष्यः ।।
सूर्यारमन्दैः शुभदृष्टिहीनैः कर्मगैर्भृतकः ।।
मन्दांशे नीचभे शुक्रे व्यये चन्द्राकौभृतकः।।
दशमगैः पापैः सौम्यादृष्टैर्भृतकः ।।

जातकपारिजाते प्राप्यते यथा [20] –

भैषज्योर्णतृणाम्बुधान्यकनकव्यापारमुक्तादिकै–
रन्योन्यागमदूतवृत्तिभिरिनस्यांशे तु जीवत्यसौ ।।
जलोद्भवानां क्रयविक्रेण कृषेश्च मृद्वाद्यविनोदमार्गात् ।
राजांगनासंश्रयवित्तरूपान्निशाकरांशे वसनक्रयाद्वा ।।
धातोर्विवादेन रणप्रकारात् स्तब्धाग्निवादात् कलहप्रवृत्त्या ।
जीवत्यसौ साहसमार्गरूपाद् धरासुतांशे यदि चौरवृत्त्या ।।
शिल्पादिकाव्यागमशास्त्रमार्गाज्ज्योतिर्गणज्ञानवशाद् बुधांशे ।
परार्थवेदाध्ययनाज्जपाच्च पुरोहिताद्याज्यवशात् प्रवृत्तिः ।।
जीवांशके भूसुरदेवतानामुपासनाध्यापकरूपमार्गात् ।
पुराणशास्त्रागमनीतिमार्गाद्धर्मोपदेशैरकुसीदमाहुः ।।
सुवर्णमाणिक्यगजाश्वमूलाद् गवां क्रयाज्जीवनमाहुरार्याः ।
गुडौदनक्षारदधिक्रयेण स्त्रियाः प्रलोभेन भृगोः सुतांशे ।।
शन्यंशके कुत्सितमार्गवृत्त्या शिल्पादिभिर्दारुमयैर्वधाद्यैः ।
विन्यस्तभाराज्जनविप्रलम्भादन्योन्यवैरागममार्गमूलात् ।।

अर्थात् सूर्यो यदि कर्मेशस्य नवांशपतिः स्यात्तर्हि जातकः औषध–ऊर्ण–तृण–जलजान्न– सुवर्णादीनां व्यापारेण, मौक्तिकादीनां व्यापारेण तथा इतस्ततः परस्परं भृत्यकार्यैव जीवनं यापयति। चन्द्रनवांशे सति जलोत्पन्नानां शंखमुक्तामीनादीनां क्रयविक्रयेण, कृषिकर्मतश्च, मृण्मयवाद्याधिकरणकमोदादिना, राजपत्नीनां समाश्रयेण लब्धवृत्तिभिः, वस्त्रादेः क्रयविक्रयतश्च जीविकामुपार्जयति । कर्मेशस्य नवांशपतौ मंगले सति सुवर्णादेः व्यवहारेण संग्रामात्, स्तब्धानलस्य प्रशान्ताग्नेः व्यवहारतः, कलहप्रवृत्या, अनीक्षितकर्तव्यतः, तस्करकर्मणा च जीवनं यापयति । कर्मेशस्थनवांशपतिः बुधो भवेत्तदा शिल्पादिना चित्र–पुस्तक–वस्त्रादिनिर्माणेन, काव्यनिर्माणेन, आगमशास्त्रमार्गात् संहितादिशास्त्रज्ञानतः, ज्योतिर्गणानां भाग्यगणनया, परस्य हेतोः वेदमन्त्राणामध्ययनेन, पौरोहित्यकर्मतो याजनतश्च जीविका भवति ।कर्मेशस्थनवांशेशे गुरौ सति ब्राह्मणानां देवानां च पूजनेन, छात्राणामध्यापनकर्मतः, पुराणशास्त्रागमनीतिमार्गात् स्वजीविकावृत्तिं मनीषिणः प्राप्नुवन्ति । शुक्रस्य नवांशे सुवर्णमाणिक्यगजाश्वादीनां व्यापारतः, गवां क्रयात्, गुडौदनक्षारदधिक्रयेण स्त्रियाः प्रलोभेन च जीवनं यापनं कुर्वन्ति । शनिनवांशे गर्हितकर्मणा, काष्ठमयचित्रादिरचनया, परेषां पीडनादिना च, भारवहनात्, जनानां वंचनकर्मतः, परस्परविद्वेषमूलतश्च जीवनं यापयन्ति । अत्र सामान्येन पापग्रहाणां नवांशे कुत्सितवृत्या शुभग्रहाणां नवांशे च गतवति कर्मेशे सुवृत्त्या जीविका कथिता परंच तत्र तत्तन्नवांशपतेः स्थितिमवलोक्यैव शुभाशुभत्वे तारतम्येन न्यूनाधिकत्वमपि वाच्यम् । यतोहि पापग्रहोऽपि बलीयां शुभोच्चादिवर्गगस्तावच्छुत्वमाप्नोति एवं शुभोऽपि निर्बलो नीचारिपापवर्गतो न तावच्छुभं भवति । यदि दशमभावः दशमेशश्च बहुभिः ग्रहैः दृष्टः स्यातां तर्हि जातकः बहुकर्मकारी भवति । तेषु सर्वाधिकबलिग्रहस्य धातुकर्मणा जातकः विशेषेण आजीविकां निर्वहति । यथोक्तं होरारत्ने [21] –

बह्वीक्षिते कर्मदलीलखेटे ध्रुवं नरः स्याद्बहुकर्मकारी ।
तेषां त्वमुं पीडयते भृशं यस्तद्धातुकर्मप्रवणो विशेषात् ।।

कारकांशगतचन्द्रः शुक्रेण दृष्टः स्यात् तदा जातकः रसायनवेत्ता भवति तत्र यदि बुधस्य दृष्टिः स्यात् तर्हि जातकः वैद्यो भवति । चन्द्रस्थितराश्याधिपस्य प्रकृत्यानुरोधेन आजीविकायाः चयनं भवति । चन्द्रेण युतो दृष्टो वा ग्रहस्य प्रकृत्यानुरोधेन जीविकाचयनमपि क्रियते । कर्मेशस्थनवांशराश्याधिपवशाद् वृत्तयः जातकपारिजातेऽपि उल्लिखिताः सन्ति [22]।
मेषादिद्वादशराशिगतग्रहानुरोधेन जीविकाविचारः उत्तरकालामृतेऽपि प्राप्यते । एवमेव नवग्रहैः द्वादशभिः राशिभिश्च जातकस्य आजीविकायाः निद्धारणं क्रियते [23]। वस्तुतः सर्वेषु जातकग्रन्थेषु पापग्रहाणां नवांशे कुवृत्त्या शुभग्रहाणां नवांशे च गते कर्मेशे सुवृत्त्या जीविका निर्धारिता । परन्तु नवांशपतेः स्थित्यानुसारेण शुभाशुभत्वं ज्ञायते ।
मुहूर्तचिन्तामणेः संस्कारप्रकरणे आजीविकायाः निर्धारणार्थं एका विधिः वर्तते । पुरा शिशोः भूम्युपवेशनकाले तस्याग्रे वस्त्रं, शस्त्रम् (छुरिकादीनि), पुस्तकम्, लेखनीम्, रौप्यम्, स्वर्णम् च स्थापयेत् । उक्त वस्तुषु यद्वस्तुं शिशुः ग्रहणं करोति (स्पर्शयति वा) तेन वस्तुना तस्य बालकस्य आजीविका निर्द्धारणं कृतवन्तः [24]। परन्तु अधुना अनया रीत्या आजीविका निर्द्धारणं न सम्भवम् । यतोहि एकैकस्य कर्मक्षेत्रस्य बहवः उपक्षेत्राणि सन्ति ।
यदि आजीविकाकारकग्रहाः बलवान् स्युः तर्हि स्व–स्व दशान्तर्दशायां शुभफलं ददाति । इदृशः शुभग्रहः स्व दशायां उच्चस्तरे, सम्मानजनकजीविकां ददाति । बलहीनकारकग्रहस्य दशायां जातकः निम्नस्तरे समाजे निम्नस्तरयुक्तकार्यक्षेत्रे वा आजीविकां प्राप्नोति । बलयुक्तः कारकः प्रयत्नं विना सुखपूर्वकं लाभप्रदं च जीविकां ददाति । बलहीनकारकः बहुप्रयत्नेनापि अल्पलाभं ददाति । आजीविकायाः दिशानिर्द्धारणं प्रकारद्वयेन क्रियते । 1. लग्नात् दशमभावगतराश्यानुसारम्, 2. नवांशेशस्य राश्यानुसारम्। यदि नवांशेशः स्वराशिगतः, स्थिरराशिगतः वा स्वराशिं पश्यति तर्हि स्वदेशे भवति । अन्यैः ग्रहैः परदेशे । यदि द्विस्वभावराशौ भवेत् तर्हि स्वदेशे परदेशे च जीविकालाभं भवति । चरराशौ परदेशे जीविकालाभं करोति [25]।
जन्मकाले यदि एकादशलग्नद्वितीयेषु शुभग्रहाः स्युः तर्हि जातकः स्वयं अनेकधा धनं प्राप्नोति । गोचरानुसारं जन्मलग्नात् दशमाधिपः गोचरे यस्मिन् नवांशे स्यात् तस्य राशेरधिपतेः धर्मानुसारं वृत्तिं भवति । अर्थात् गोचरानुसारं मानवस्य वृत्तिमपि परिवर्तते [26]। प्राचीनकालादेव समाजे कार्याणां बहुविधत्वं वर्तते तेषु केचन् कार्याणि प्रसस्तिदायकं तथा केचन् कार्याणि अप्रसस्तिदायकं च भवति । परं ज्योतिषशास्त्रे उच्चकर्मवृत्तिस्तथा निम्नकर्मवृत्तिः ग्रहाणां जन्मकालीकस्थित्याश्रितं भवति। अस्मिन् शोधपत्रे ज्योतिषशास्त्रानुरुपं केचन् योगाः लिख्यन्ते ।

- **आजीविकायां कर्मवैकल्यप्रसिद्धियोगाश्च –**

कुण्डल्यां दशमेशः यदि बलहीनः स्यात्तर्हि जातकः सर्वेषु कार्येषु असफलतां प्राप्नोति । दशमे शुभयुक्ते स्वजीविकायां मानप्रतिष्ठां च प्राप्नोति । यथोक्तम् [27] –

ओजसा रहित आस्पदाधिपो नास्पदं निखिलकर्म्मणां नरः ।
आस्पदस्य रमणः सशोभनः स्वीयमन्दिरगतः स मानभाक् ।।

कारकांशलग्ने यदि शनिः वर्तते तर्हि जातकः स्वजीविकया प्रसिद्धिं प्राप्नोति । यथोक्तम् [28]'' अंशे मन्दे प्रसिद्धकर्माजीवी ''। यदि

बलयुक्तः सूर्यः स्वोच्चे मेषे वर्तते तर्हि मानवः स्वपराक्रमेण स्वशक्त्या स्वाजीविकां निर्वहति । यथोक्तम् [29] ''तुंगे बलिनि तरणावात्मनो विक्रमात्स्वम् ''। कर्माधिपे हीनबले सपापे कर्मादिवैकल्यमुशन्ति तज्ज्ञाः'' । इत्यनेन दशमेशः यदि बलहीनो वर्तते अथवा पापग्रहेण युक्तः स्यात्तर्हि कर्मवैकल्यो भवति [30]। दैवज्ञाभरणेऽपि कर्महीनयोगमुल्लिखितमस्ति । नीचराशिगतग्रहेण युक्तः शनिः यदि कर्मस्थानगतो तथा कर्मेशः यदि पापग्रहेण युक्तो भवेत् तर्हि जातकः कर्महीनो भवति । राहुणा युक्तः कर्मेशः यदि षष्ठे, अष्टमे, व्यये वा स्यात्तर्हि जातकः कर्महीनः कर्मवृद्धेः असमर्थो च भवति । पापकर्मेशः यदि नीचराशौ तथा दशमभावात् दशमे अर्थात् सप्तमे स्यात्तर्हि कर्मविकलतायाः योगो भवति । यथोक्तम् [31] –

> कर्मस्थानगते मन्दे नीचखेचरसंयुते ।
> कर्मेशे पापसंयुक्ते कर्महीनो भवेन्नरः ।।
> कर्माधिपे राहुयुते षष्ठाष्टमव्ययस्थिते ।
> वृद्धिकर्म न शक्नोति कर्महीनो भवेन्नरः ।।
> कर्मेशे नीचराशिस्थे कर्मेशे पापखेचरे ।
> कर्मात्कर्मस्थिते पापे कर्मवैकल्यमादिशेत् ।।

पापग्रहेण युतो दृष्टो वा कर्मेशः यदि नीचराशिगतः अस्तंगतो वा स्यात्तर्हि जातकः पापकर्मरतो भवति । नीचराशौ कर्मेशः तथा दशमे अष्टमेशः पापग्रहेण युतः स्यात्तर्हि जातकः दुष्कर्मरतो भवति । तद्यथा [32] –

> कर्मस्थानाधिपे चैव पापग्रहयुतेक्षिते ।
> अस्तं गते वा नीचस्थे पापकर्मा च मानवः ।।
> कर्मेशे नीचराशिस्थे रन्ध्रेशे कर्मसंयुते ।
> पापग्रहेण संयुक्ते दुष्कर्मनिरतो भवेत् ।।

यदि नीचास्तंगतपापग्रहः एकादशे लग्ने द्वितीये वा स्यात्तर्हि जातकः स्वकार्यक्षेत्रे सफलतां न प्राप्नोति । यदि कुण्डल्यां षष्ठेशः सूर्येण राहुणा वा युक्तः द्वादशे स्यात्तर्हि जातकः नीचवृत्तिः करोति तथा परगृहे वसति । लग्नकुण्डल्याः अष्टमे शुभग्रहः अथवा पापग्रहः, चन्द्रकुण्डल्याः द्वितीये पंचमे वा गुरुः वर्तते चेत् जातकः जघन्यकर्मणा जीविकानिर्वाहं करोति। यथोक्तं जातकभूषणे [33] –

> प्रान्त्ये तमार्कान्यतरान्विते रिपोर्नाथे कुवृत्तिर्वसतिः परालये ।
> सौम्ये खले वाऽऽयुषि सोमतो गुरौध्यर्थेऽस्य वृत्तिः सुजघन्यकर्मतः ।।

दैवज्ञाभरणेऽपि एतादृशं मतं परिदृश्यते । यथोक्तम् –

> षष्ठेशे राहुसंयुक्ते व्ययभावगते यदि ।
> नीचवृत्तं भवेत्तस्य जातस्य केतुरीदृशम् ।।
> षष्ठेश्वरे रवियुते शत्रुस्थे वाऽन्यवेश्मनि ।
> करोति जातः पुरुषो नीचवृत्तिं शिरोव्रणी ।।

दैवज्ञाभरणानुसारं द्वादशभावगतः षष्ठेशेन युक्तः केतुरपि पूर्वोक्तफलं ददाति । सूर्येण युक्तः षष्ठेशः यदि षष्ठभावे वा अन्यस्मिन् राशौ भवति तर्हि जातकः नीचवृत्तिं करोति । जातकतत्त्वे किंचिद् भिन्नमतं दृश्यते । चन्द्रात् द्वितीये पंचमे वा गुरुः तथा चन्द्रात् अष्टमे नवमे वा पापग्रहः स्यात्तर्हि जातकः निन्दनीयकार्यं कृत्वा जीवनं यापयति । लग्नेशः दशमे, शनिः त्रिकोणे धने वा तथा पापग्रहः अष्टमे स्यात्तर्हि जातकः नीचकर्माजीवी भवति । यथोक्तम् [34] –

> चन्द्राद्धने पुत्रे जीवेऽष्टमे शुभे वा पापे निन्द्यकर्माजीवी ।।
> राज्येऽगेशे त्रिकोणार्थे मन्दे पापैर्मृत्युगैर्नीचवृत्याजीवी ।।

सर्वार्थचिन्तामण्यानुसारं चन्द्रात् पंचमे द्वितीये वा लग्नेशः अष्टमे पापग्रहस्तथा लग्नात् दशमभावे चन्द्रः यदि वर्तते तर्हि जातकः हेयवृत्त्या स्वजीविकानिर्वाहं करोति [35]।

> चन्द्रात्सुतेऽर्थे यदि लग्ननाथे रन्ध्रस्थितैः सौम्यखगेतरैर्वा ।
> मानस्थिते रात्रिकरे तदानीं जातस्तु जीवत्यपि हेयवृत्त्या ।।

सर्वार्थचिन्तामणेः अष्टमेऽध्याये मृगयात्री योगान् उल्लिखितोऽस्ति । मृगयात्री नाम हिन्दीभाषायां ''फेरीवाला'' इत्युच्यते । दशमेशः यदि द्विस्वभावनवांशगतो भवति तदा जातकः मृगयात्रया जीविकोपार्जनं करोति । तद्यथा [36] –

> मानाधिपे चरांशस्थे संचारसहिता भवेत् ।
> स्थिरांशे स्थैर्यमुद्दिष्टं मृगयात्रा द्विदेहगे ।।

षष्ठेशः यदि तृतीये स्यात्तर्हि जातकः काष्ठपाषाणादिगृहोपयोगीनां सामग्रीणां विक्रेता भवति । तद्यथा –'' षष्ठेशे सौत्थे काष्ठपाषाणादिविक्रेता '' । यदि जन्मांगे वृषकन्यामकरराशिषु स्थितः दशमेशचन्द्रः शनिना इत्थशालयोगं निर्माति तदा जातकः उपलकर्मणा अर्थात् पाषाणेन मूर्तिनिर्माता भवति । यदि उक्तयोगः सूर्येण दृष्टः स्यात्तर्हि पाषाणेन गृहनिर्माता, शुक्रेण युक्तः सूर्यः दशमेशचन्द्रं पश्यति तदा तृणकाष्ठादिभिः जीवनं यापनं करोति । मेषसिंहधनुराशिषु स्थितः दशमेशचन्द्रः भौमेन इत्थशालयोगं निर्माति तर्हि अग्निना जीविकायाः उपार्जनं करोति । यदि कर्मेशचन्द्रः गुरुणा दृष्टः स्यात्तर्हि कांस्यधातुना, कर्मेशचन्द्रः शनिना दृष्टः स्यात्तर्हि लौहेन, कर्मेशचन्द्रः शुक्रेण दृष्टः स्यात्तर्हि सुवर्णेन, कर्मेशचन्द्रः बुधेन दृष्टः स्यात्तर्हि रसायनेन जीवनं यापयति । यदि धनु वा मीनराशिस्थितदशमेशचन्द्रः गुरुणा इत्थशालयोगं निर्माति तर्हि जातकः धर्मशास्त्रस्य ज्ञाता भवति। यथोक्तम् [37] –

> कर्माधिकारिणि विधौ शनिनेत्थशाले भूमौ करोत्युपलकर्म निरीक्षिताभम् ।
> भौमेन चाग्निभवनेऽग्निविधिं तदाभं जीवेन जीवभवनेऽर्हति धर्मशास्त्रम् ।।

- **सुगन्धितवस्तु–वस्त्रादिविक्रययोगाश्च –**

यदि कुण्डल्यां दशमेशशुक्रः लग्ने रूक्षराशौ स्वहर्षस्थाने स्यात्तदा जातकः सौगन्धिकः, तुलाराशिस्थितः शनिः दशमेशशुक्रं पश्यति अथवा दशमे भावे मकरराशिस्थः शुक्रः तुलाराशिस्थशनिना दृष्टः स्यात्तर्हि सौन्दर्यवर्द्धकवस्तूनां विक्रेता, वृषराशिस्थितकर्मेशशुक्रः शनिना दृष्टः स्यात्तदा सौगन्धितैलविक्रेता, शनिना युक्तः दशमेशः मनुष्यराशौ भवेत्तर्हि सौगन्धिकपदार्थविक्रेता, मेष वा वृषराशिस्थितदशमेशशुक्रः लग्ने स्थितः सन् गुरुशनिभ्यां दृष्टः स्यात् वा बलयुक्तः शुक्रः शनिना दृष्टः स्यादथवा दशमेशभौमः कन्याराशिस्थितशनिना दृष्टः स्यात्तर्हि जातकः सौगन्धिकपदार्थानां निर्माता वा विक्रेता भवति [38] । कुण्डल्यां स्थिरराशौ स्थितशुक्रः लग्ने वा दशमभावे वा वृषकन्यामकरराशिस्थिते वा बुधेन दृष्टः स्यादथवा स्थिरराशिस्थितलग्ने वा दशमभावस्थिते शुक्रः मिथुनतुलाकुम्भराशिषु स्थितबुधेन दृष्टः स्यादथवा मिथुनतुलाकुम्भराशिस्थितशुक्रः लग्ने वा दशमे भावे स्थिरराशिस्थबुधेन दृष्टः स्यादथवा मिथुनतुलाकुम्भराशिषु स्थितबुधशुक्रश्च लग्ने वा दशमे स्यातां तर्हि वस्त्रविक्रेता जातको भवति। कुम्भे वा मकरराशौ स्थितशनिः कन्याराशिस्थितबुधेन वा तुलाराशिस्थितबुधेन दृष्टः स्यात्तर्हि जातकः रेशमीवस्त्रविक्रेता, यदि कन्याराशिस्थशुक्रः बुधेन दृष्टः स्यात्तर्हि जातकः स्थूलवस्त्रविक्रेता, बुधगुरुभ्यां युक्तः शनिः मकरराशौ स्यात्तर्हि जातकः जीर्णशीर्णवस्त्राणां विक्रेता, यदि मकरराशिस्थशनिः वृषराशिस्थितगुरुणा दृष्टः स्यात्तर्हि पट्टांशुकः, यदि दशमेशशनिः बुधस्य राशौ स्थितः भौमेन दृष्टः स्यात्तर्हि जातकः रक्तवस्त्रविक्रेता, चतुष्पदराशिस्थितगुरुः चतुष्पदराशिस्थिताष्टमेशेन दृष्टः स्यात्तर्हि जातकः कम्बलविक्रेता च भवति [39]।

- **फल–अन्नादिविक्रययोगः –**

कुण्डल्यां मकरराशिगतशनिः यदि गुरुणा दृष्टः स्यात् अथवा कर्कराशिगतशनिः मकरराशिगतगुरुणा दृष्टः स्यात्तर्हि जातकः

दाडिमादीनां फलानां विक्रयकर्ता भवति । परन्तु मकरराशिगतशनिः यदि मीनराशिगतगुरुणा दृष्टः स्यात्तर्हि जातकः उत्कटं फलं व्यवहरति । यदि वृषराशिस्थः गुरुः कर्कराशिगतभौमेन दृष्टः स्यात्तर्हि जातकः लघुफलानां विक्रयकर्ता भवति । यदि दशमेशबुधः जलराशिगतो भवेदथवा दशमराशिगतबुधः चन्द्रेण दृष्टो भवेत्तर्हि जातकः कर्कटीचारुवल्कलादीनां विक्रयकर्ता भवति। तद्यथा [40] –

मकरयुजि शनैश्चरे कुलीरेऽनिमिषगतेज्यदृशा हि दाडिमाद्यम् ।
व्यवहरति फलोत्कटं किलैवं वृषगगुरौ लघुकर्कगारदृष्ट्या ।।
मृगे शनौ कुलीराब्जदृष्टे वल्कलमर्थयेत् ।
ज्ञे जलर्क्षे च तद्दृष्टे कर्कटीचारुवल्कलम् ।।

यदि कुण्डल्यां दशमेशबुधः मेषसिंहधनुराशिषु स्थित्वा मेषसिंहधनुराशिस्थितशनिना दृष्टः स्यादथवा मकरराशिगतशनिः वृषराशिस्थितचन्द्रेण दृष्टः स्यात्तर्हि जातकः यवस्य व्यापारेण जीविकां करोति। यदि मकरराशिगतशनिः कन्याराशिस्थितचन्द्रेण दृष्टः स्यात्तर्हि सगोधूममसूरादीनां व्यापारेण जीवनं यापनं करोति । यदि वृषराशौ स्थितगुरुणा साकं शनिः अन्यैः ग्रहैरदृष्टः स्यात्तर्हि जातकः मिश्रितान्नस्य व्यवसायी भवति । वृषराशौ स्थितशनिः कन्याराशिस्थितगुरुणा दृष्टः स्यात्तर्हि जातकः तिलस्य वृषराशौ भौमः शनिना साकं स्थितः स्यात्तर्हि तिक्तान्नस्य, सूर्येण साकं शनिः वा वृषराशिस्थितशनिः कन्याराशिस्थितसूर्येण दृष्टः स्यात्तर्हि गोधूमस्य, चन्द्रेण साकं शनिः वृषराशौ स्थितः स्यात्तर्हि स्निग्धपदार्थस्य, कन्याराशिस्थितचन्द्रः शनिना दृष्टः स्यात्तर्हि तण्डुलतिलयोः, मकरराशिस्थसूर्यः शनिचन्द्राभ्यां दृष्टः स्यात्तर्हि यवस्य वा यवोत्पन्नवस्तूनां च व्यवसायी भवति [41]।

- **चतुष्पद–मणि–सुवर्णादिविक्रययोगः –**

कुण्डल्यां चतुष्पदराशौ स्थितदशमेशगुरुः चतुष्पदराशिस्थषष्ठमेशेन दृष्टः स्यात्तर्हि राशिसदृशपशूनाम्, यदि दशमेशगुरुः चतुष्पदराशिस्थषष्ठेन दृष्टः स्यात्तर्हि उष्ट्राणाम्, बुधेन दृष्टः स्यात्तर्हि गर्दभानाम्, यदि दशमेशगुरुः चतुष्पदराशिस्थबुधस्य षड्वर्गे स्थितचन्द्रेन दृष्टः स्यात्तर्हि सुरभीणाम्, यदि गुरुः चतुष्पदराशिस्थसूर्यस्य शत्रुदृष्ट्या दृष्टः स्यात्तर्हि अश्वानाम्, यदि सूर्यराशिस्थितगुरुः चतुष्पदराशिस्थशनेः शत्रुदृष्ट्या दृष्टः स्यादथवा चतुष्पदराशिस्थितसप्तमेशः षष्ठभावे स्यात्तथा सप्तमेशेन दशमेशगुरुः दृष्टः स्यात्तदा छागानाम्, यदि दशमेशगुरुः द्वितीयभावस्थचतुष्पदराशिस्थितनवमेशेन दृष्टः स्यात्तर्हि दुग्धनिर्मितपदार्थानाम्, यदि दशमेशगुरुः द्वितीयभावस्थचतुष्पदराशिस्थिततृतीयेशेन दृष्टः स्यात्तर्हि सुरभीनां च व्यवसायेन जीवनं यापनं करोति [42]। कुण्डल्यां दशमेशशुक्रः सूर्येण युक्तः स्यात्तर्हि उत्तममणीनाम्, यदि जलचरराशिस्थितदशमेशशुक्रः अग्निराशिस्थितभौमेन दृष्टः स्यात्तर्हि मुक्तानाम्, यदि मिथुनराशिस्थितदशमेशशुक्रः शनिना युक्तः स्यात्तर्हि मध्यमरत्नानाम्, यदि जलचरराशिस्थशनिः शुक्रेण दृष्टः स्यात्तर्हि अधममणीनाम्, यदि जलचरराशिस्थशनिः चन्द्रेण दृष्टः स्यात्तर्हि शिप्राणाम्, यदि जलचरराशिस्थशनिः समस्तग्रहैरदृष्टः स्यात्तर्हि जातकः कपर्दीनां च व्यवसायेन जीवनं यापयति [43]।
कुण्डल्यां दशमेशसूर्यः अग्निराशिस्थधनेशेन दृष्टः स्यात्तर्हि सुवर्णस्य, दशमेशशनिः चन्द्रेण दृष्टः स्यात्तर्हि रजतसुवर्णयोः, धनेशेन युक्तः मेषराशिस्थितशनिः धनुराशिस्थितसूर्येण दृष्टः स्यात्तर्हि निर्मलमुक्तानाम्, धनुराशिस्थितशनिः सिंहस्थसूर्येण दृष्टः स्यात्तर्हि जातकः धातूनां शोधनेन च जीवनं यापयति [44]।

- **कारुकयोगः (शिल्पीयोगः) –**

धनुरथवा कन्यालग्नोत्पन्नजातकस्य कुण्डल्यां दशमेशः बुधः यदि स्वनीचराशौ अथवा वक्रगतियुक्तः स्यात्तर्हि जातकः कारुको भवति । यदि दशमेशः शनिः मिथुनराशौ वर्तते तर्हि जातकः कारुको भवति । तद्यथा [45] –

नीचे वक्रे बुधे कर्मदलीले दृष्टिमानतः ।
कुविन्दस्येश्वरो मन्दे मिथुनस्थेऽप्यहर्निशम् ।।

- **भिक्षाटनयोगः –**

कर्मेशः यदि षष्ठे, अष्टमे वा द्वादशे स्यात्तर्हि जातकः आजीवनं भिक्षाटनं करोति । तद्यथा [46] ''कर्मेशे रिपुरन्ध्ररिष्फभवने स्याज्जीवभिक्षाटने ।'' जातकभूषणानुसारं स्व–स्वोच्चराशिगतग्रहाः यदि नवांशकुण्डल्यां शत्रुनीचादिराशिगताः स्युः तर्हि जातकः सत्कृत्यवर्जितः, भिक्षुकश्च भवति । यथोक्तम् [47] –

गुह्यं भगन्दरमुखामयभाक् खगेन्द्राः सर्वे यदाऽधरसपत्नलवोपयाताः ।
तुंगस्थिता अपि तदा शुभकर्म्महीनं भिक्षाशिनं च जनयन्ति जनं तदानीम् ।।

होरारत्नग्रन्थे भिक्षुकयोगानां लक्षणानि भिन्नरीत्या प्रतिपादितमस्ति । यदि केन्द्रे पापग्रहाः वा केन्द्रे ग्रहाभावः स्यात्तर्हि जातकः दरिद्रो भवति । यदि शुभग्रहाः अस्तासन्नाः स्युः तर्हि जातकः भिक्षुको भवति । कुण्डल्यां पुण्यसहमग्रहो चन्द्रो वा पापपीडितः अथवा चन्द्रात् दशमे भौमः शनिना दृष्टः स्यात् अथवा चन्द्रात् दशमे भौमेन दृष्टः शनिः शुभग्रहैरदृष्टः स्यात्तर्हि जातकः एतेषु योगेषु भिक्षुको भवति । तत्र अन्याः योगाः अपि प्रतिपादितमस्ति ।(1) द्वादशे पापगहेण दृष्टः भौमः, (2) चन्द्रः शनिना युक्तः भौमेन दृष्टः, (3) द्वादशे पुण्यसहमेशश्चन्द्रेण शुभग्रहैश्चादृष्टः स्यात्, (4) राकादर्शपयोः षष्ठे व्यये वा गतयोस्तथा केन्द्रे पाग्रहाः स्युः, (5) चन्द्रमा पापग्रहाणां मध्ये क्रूरग्रहस्य शत्रुदृष्ट्या स्यात् । एतेषु योगेष्वपि जातकः भिक्षाटनं करोति । ते यथा –

क्रूरैः केन्द्रे केन्द्रहीनैश्च सौम्यैरस्तासन्नैदुर्गतः स्याच्च भिक्षुः ।
पुण्येन्दुभ्यां क्रूरिताभ्यां कुजार्क्योरिन्दोर्युक्त्या खे विना सौम्यदृष्टिः ।।
भौमे रिष्फगते विधौ च शनिना युक्ते कुजावेक्षिते
हीने सौम्यदृशा व्यये तु सहमेनाब्जेक्षिते क्रूरिते ।
राकादर्शपयोर्व्ययारिगतयोः पापैश्च केन्द्रस्थितै–
रिन्दोः क्रूरखगान्तरे रिपुदृशा क्रूरस्य भिक्षाटनम् ।। [48]

मेषराशिगतचन्द्रं भौमः पश्यति, चन्द्रः शुभग्रहाणां दृष्टेः रहितो भवति, नीचनवांशगताः अस्तनवांशगताः वा सर्वे ग्रहाः यदि द्वादशे दशमे वा स्युः, द्वादशे गुरुः, केन्द्रे शनिः तथा लग्ने चन्द्रः स्यात्तर्हि एते सर्वे भिक्षुकयोगाः सन्ति । तद्यथा [49] –

मेषे चन्द्रे भौमदृष्टे भिक्षुकः ।
चन्द्रे शुभदृग्धीने दासोऽथवा भिक्षुकः ।।
सर्वग्रहैर्नीचमूढांशगैः कर्मान्त्यगैर्भिक्षुकः ।
अन्त्ये गुरौ केन्द्रे शनौ लग्नेऽब्जे भिक्षुकः ।।

वस्तुतः स्वतन्त्रकार्यक्षेत्रस्यापि बहबो भेदाः सन्ति । चिकित्साक्षेत्रे विशेषरूपेण रविचन्द्रराहुग्रहाणां, यान्त्रिकी क्षेत्रे च बुधभौमयोः प्रभावः दृश्यते । यदि बहबः आजीविकाकारकग्रहाः भवन्ति तर्हि जातकः मुख्यजीविकया साकं सहायकजीविकया उपार्जनं करोति। आजीविकायाः विचारः द्वितीयचतुर्थभावाभ्यामपि करणीयम् । यतोहि अधुना कार्यक्षेत्रस्य निर्णयः मानवस्य शिक्षामाध्यमेन भवति । विद्यायाः प्रकारः दिशाविचारश्च द्वितीयभावात् क्रियते । उच्चशिक्षायाः विचारः चतुर्थभावात् क्रियते ।
द्वितीयभावगतैः शनिराहुसूर्यैः जातकः चिकित्साशास्त्रस्याध्ययनं करोति । यदि एते ग्रहाः द्वितीये स्युः अथवा द्वितीयभावं पश्यन्ति तर्हि जातकः चिकित्साशास्त्रस्याध्ययनं कृत्वा तत्सम्बन्धितक्षेत्रे कार्यं कृत्वा धनमर्जयति । द्वितीयभावमुपरि गुरुशुक्रयोः प्रभावेन जातकः

न्यायविद्यायाः(स्वू) अध्ययनं करोति । शुक्रबुधाभ्यां जातकः कलाक्षेत्रे (।तजे) अध्ययनं करोति ।

द्वादशभावेषु दशमभावात् आजीविकानिर्द्धारणं क्रियते । तदतिरिच्य अन्येषां भावानामपि आजीविकानिर्द्धारणे महनीयं योगदानं भवति । न केवलं लग्नात् दशमस्थानमपितु चन्द्रात् सूर्याच्च यद् दशमस्थानं तत् सर्वमपि आजीविकायाः द्योतकाः सन्ति । शारीरिकबलस्य शारीरिकपरिश्रमस्य च आवश्यकता यस्यां आजीविकायां भवति तस्याः आजीविकायाः विचारः लग्नात् यः दशमेशः तस्मात् क्रियते । यस्यामाजीविकायां मनोबलस्य आवश्यकता भवति तस्याः आजीविकायाः विचारः चन्द्रलग्नात् दशमेशः यः तस्मात् करणीयम् । यस्यामात्मबलस्यावश्यकतां वर्तते तस्याः सूर्यात् यः दशमेशः तस्मात् च करणीयम् । यस्यामाजीविकायां त्रयाणामात्मबलशारीरिकबलमनोबलानामावश्यकता वर्तते तस्याः निर्द्धारणं ग्रहत्रयेण कर्तव्यम् ।

### संधर्व ग्रन्थ सूचि


1. अमरकोषः 2/9/1
2. मनुस्मृतिः, अ. 10, श्लो.116,
3. मनुस्मृतिः, अ. 10, श्लो.115,
4. मनुस्मृतिः, अ. 4, श्लो.9,
5. मनुस्मृतिः, अ.10, श्लो.76,
6. मनुस्मृतिः, अ.10, श्लो.79,80
7. मनुस्मृतिः, अ.10, श्लो.81–83,
8. बृहत्पराशरस्मृतिः, 5/141
9. सर्वार्थ.चि.अ.8, श्लो.1
10. सर्वार्थ.चि.अ.8, श्लो.3
11. जातकभूषणम, कर्मभावाध्यायः, श्लो. 13
12. ज.पा. अ. 5, श्लो. 43,
13. सारावली
14. जा.पा. अ. 15, श्लो. 43.5
15. जैमिनीसूत्रम् अ.1, पाद 1, सूत्रम् 11,
16. उत्तरकालामृतम् ग्रहभावफलखण्डाध्यायः, श्लो. 45,
17. जैमिनीसूत्रम्, अ.1, पाद 2, सूत्रम् 14–21,
18. जैमिनीसूत्रम्, अ.1, पाद 2, सूत्रम् 66–67,
19. जातकतत्त्वम् सहजविवेकः, सूत्रसं. 41–45,
20. जा.पा. अ. 15, श्लो. 44–50,
21. होरारत्नम्, अ. 6, श्लो. 1
22. जा.पा. अ. 15, श्लो. 44–50
23. उत्तरकालामृतम्, कारकत्वखण्डे श्लो. 27–29
24. मुहूर्त्तचिन्तामणिः, संस्कारप्रकरणम्, श्लो. 22
25. फलितमार्त्तण्डे, पृ.228, श्लो. 9,
26. फलितमार्त्तण्डे, पृ.228, श्लो. 10,
27. जा.भू. कर्मभावाध्यायः, श्लो. 18
28. जातकतत्त्वम् सहजविवेकः, सूत्रसं. 50,
29. जातकभूषणम्, कर्मभावाध्यायः, श्लो. 13,
30. सर्वार्थचिन्तामणिः, अ.8, श्लो. 1
31. दैवज्ञाभरणम्, कर्मचिन्ता, श्लो. 16–18, पृ.279
32. दैवज्ञाभरणम्, कर्मचिन्ता, श्लो. 19–20, पृ.280
33. जातकभूषणम्, प्रकीर्णविषयाध्यायः, श्लो. 25,
34. जातकतत्त्वम् सहजविवेकः, सूत्रसं. 56,58
35. सर्वार्थचिन्तामणिः, अ.9, श्लो.63, पृ. 275,
36. सर्वार्थचिन्तामणिः, अ.8, श्लो.29,
37. होरारत्नम्, अ.6, उपलादिकर्मयोगः, श्लो.1, पृ. 75,
38. होरारत्नम्, अ.6, सुगन्धवस्तुविक्रययोगः, श्लो.1,2,3, पृ. 76,
39. होरारत्नम्, अ.6, वस्त्रविक्रययोगः, श्लो.1,2,3, पृ. 77,
40. होरारत्नम्, अ.6, फलविक्रययोगः, श्लो.1,2, पृ.77,
41. होरारत्नम्, अ.6, अन्नविक्रययोगः, श्लो. 1,2, पृ. 78,
42. होरारत्नम्, अ.6, चतुष्पदविक्रययोगः, श्लो. 1, पृ. 79,
43. होरारत्नम्, अ.6, मणिविक्रययोगः, श्लो. 1, पृ. 79,
44. होरारत्नम्, अ.6, सुवर्णविक्रययोगः, श्लो. 1, पृ. 80,
45. होरारत्नम्, अ.6, कारुकयोगः, श्लो. 2,
46. दैवज्ञाभरणम्, अष्टादशप्रकाशः, श्लो. 52,
47. जातकभूषणम्, प्रकीर्णविषयाध्यायः, श्लो. 21
48. होरारत्नम्, अ.6, भिक्षुकयोगाः, श्लो.1,2, पृ.84,
49. जातकतत्त्वम् सहजविवेकः, सूत्रसं. 52–55